# অভিলাষাষ্টকং

{॥ অভিলাষাষ্টকং ॥}

॥ অথ অভিলাষাষ্টকম্ ॥

কদা পক্ষীন্দ্রাংসোপরি গতমজং কঞ্জনযনম্
রমাসংশ্লিষ্টাংগং গগনরুচমাপীতবসনম্ ।
গদাশংখাম্ভোজারিবরমালোক্য সুচিরং
গমিষ্যত্যেতন্মে ননু সফলতাং নেত্রযুগলম্ ॥ ১॥

কদা ক্ষীরাব্ধ্যন্তঃ সুরতরুবনান্তর্মণিমযে
সমাসীনং পীঠে জলধিতনযালিংগিততনুম্ ।
স্তুতং দেবৈর্নিত্যং মুনিবরকদংবৈরভিনুতম্
স্তবৈঃ সন্তোষ্যামি শ্রুতিবচনগর্ভৈঃ সুরগুরুম্ ॥ ২॥

কদা মামাভীতং ভযজলধিতস্তাপসতনুং
গতা রাগং গংগাতটগিরিগুহাবাসসহনম্ ।
লপন্তং হে বিষ্ণো সুরবর রমেশেতি সততং
সমভ্যেত্যোদারং কমলনযনো বক্ষ্যতি বচঃ ॥ ৩॥

কদা মে হৃদ্পদ্মে ভ্রমর ইব পদ্মে প্রতিবসন্
সদা ধ্যানাভ্যাসাদনিশমুপহূতো বিভুরসৌ ।
স্ফুরজ্জ্যোতীরূপো রবিরিব রসাসেব্যচরণো

হরিষ্যত্যজ্ঞানাজ্জনিততিমিরং তূর্ণমখিলম্ ॥ ৪॥

কদা মে ভোগাশা নিবিডভবপাশাদুপরতং
তপঃশুদ্ধং বুদ্ধং গুরুবচনতোদৈরচপলম্ ।
মনো মৌনং কৃত্বা হরিচরণযোশ্চারু সুচিরং
স্থিতিং স্থাণুপ্রায়াং ভবভযহরাং যাস্যতি পরাম্ ॥ ৫॥

কদা মে সংরুদ্ধাখিলকরণজালস্য পরিতো
জিতাশেষপ্রাণানিলপরিকরস্য প্রজপতঃ ।
সদোংকারং চিত্তং হরিপদসরোজে ধৃতবতঃ
সমেষ্যত্যুল্লাসং মুহুরখিলরোমাবলিরিযম্ ॥ ৬॥

কদা প্রারব্ধান্তে পরিশিথিলতাং গচ্ছতি শনৈঃ
শরীরে চাক্ষৌঘেঽপ্যুপরতবতি প্রাণপবনে ।
বদত্যূর্ধ্বং শশ্বন্মম বদনকংজে মুহুরহো
করিষ্যত্যাবাসং হরিরিতি পদং পাবনতমম্ ॥ ৭॥

কদা হিত্বা জীর্ণাং ত্বচমিব ভুজংগস্তনুমিমাং
চতুর্বাহুশ্চক্রাম্বুজদরকরঃ পীতবসনঃ ।
ঘনশ্যামো দূতৈর্গগনগতিনীতো নতিপরৈ-
র্গমিষ্যামীশস্যাংতিকমখিলদুঃখাংতকমিতি ॥ ৮॥

॥ ইতি শ্রীমৎপরমহংসস্বামিব্রহ্মানন্দবিরচিতং

অভিলাষাষ্টকং সম্পূর্ণম্ ॥

Encoded and proofread by Narayanaswami at swami at math.mun.ca

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Abhilasha Ashtakam 3 Lyrics in Bengali PDF
% File name : abhilaashha8.itx
% Category : aShTaka
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Latest update : October 1, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website